# shrIgokuleshastavaH

# શ્રીગોકુલેશસ્તવઃ

## Document Information

Text title : gokuleshastavaH

File name : gokuleshastavaH.itx

Category : vishhnu, krishna, puShTimArgIya, kRiShNarAya, vishnu, stava

Location : doc_vishhnu

Author : kRRiShNarAya

Proofread by : PSA Easwaran psawaswaran

Description/comments : puShTimArgIya stotraratnAkara

Latest update : February 28, 2018

Send corrections to : sanskrit at cheerful dot c om

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

December 22, 2023

*sanskritdocuments.org*

# શ્રીગોકુલેશસ્તવઃ

સ્વયં યોઽવતીર્ય ક્ષિતૌ વિઠ્ઠલેશા-
દશેષં જગત્પાલકો ગોકુલેશઃ ।
સુવેશોઽનિશં શોભતે તત્સમાનો
ન ભૂતો ન ભાવી ન વા વર્તમાનઃ ॥ ૧॥

સમસ્તં યતિગ્રસ્તધર્મં ચ ગોમું
નિજોક્ત્યાઽવમત્યા જગત્યા અધીશમ્ ।
નિરસ્યેહ યઃ સ્તૂયતે તસ્ય તુલ્યો
ન ભૂતો ન ભાવી ન વા વર્તમાનઃ ॥ ૨॥

સુકેશો યશોભૂષિતો ગોકુલેશઃ
સ્વયોષિન્મનોભોગિવેષી ય એષઃ ।
અશેષજ્ઞલોકોઽપિ તસ્માદ્વિશેષો
ન ભૂતો ન ભાવી ન વા વર્તમાનઃ ॥ ૩॥

સમેતાર્થવિશ્વાનીતાનન્તવિત્તઃ
સુપુણ્યૈર્ગુણૈઃ સર્વદા શોભમાનઃ ।
ધરણ્યામિહૈતત્સમોદારચિત્તો
ન ભૂતો ન ભાવી ન વા વર્તમાનઃ ॥ ૪॥

સ્વરૂપાત્મકાનન્દદાનૈકદક્ષો
વધૂવક્ત્રચન્દ્રાનુરજ્યત્કટાક્ષઃ ।
તદીયાધરસ્થામૃતાસ્વાદકોઽન્યો
ન ભૂતો ન ભાવી ન વા વર્તમાનઃ ॥ ૫॥

વ્રજાનન્દકન્દો નિજાનન્દપૂર્ણઃ
સદાનન્દરૂપઃ સદા રાજતે યઃ ।
સદા ભક્તકાનન્દદાતા તતોઽન્યો
ન ભૂતો ન ભાવી ન વા વર્તમાનઃ ॥ ૬॥

સમસ્તૈ રસૈરુલ્લસન્ ગોકુલે યો
જયત્યેષ પૂર્ણઃ પુમાનેવ નિત્યમ્ ।
સ્વકીયાઙ્ગનાકામનાપૂરકોઽન્યો
ન ભૂતો ન ભાવી ન વા વર્તમાનઃ ॥ ૭॥

સદાઽઽનન્દયન્ સેવિનઃ સદ્રસૌઘૈઃ
શ્રિયો વલ્લભો દુર્લભો ગોકુલેશઃ ।
ય એવંવિધો રાજતે તં વિનાઽન્યો
ન ભૂતો ન ભાવી ન વા વર્તમાનઃ ॥ ૮॥

નવં ગોકુલેશસ્તવં સુશ્રવં યઃ
શિવં સર્વદા કૃષ્ણરાયોક્તમેતમ્ ।
પઠેદષ્ટપદ્યં સ સદ્યોઽનવદ્યં
સ્વરૂપં તદીયં પ્રપદ્યેત હૃદ્યમ્ ॥ ૯॥

ઇતિ કૃષ્ણરાયોક્તઃ શ્રીગોકુલેશસ્તવઃ સમાપ્તઃ ।

Proofread by PSA Easwaran

*shrIgokuleshastavaH*

pdf was typeset on December 22, 2023

Please send corrections to *sanskrit@cheerful.com*